सर्व्वेषां सम्मतं कुर्य्यादिति वै रोहिणीव्रतम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥
अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।
“अष्टम्यामथ रोहिण्यां न कुर्य्यात् पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्जितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम् ॥”
अत्रोभयवियोगे पारणमुक्तम् । “यदा सार्द्धप्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतरवियोगेऽपि पारणम् ॥ तथा च नारदीये ।
“तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
नायोगिके व्रते प्राप्ते यद्यप्येको वियुज्यते ।
तत्रैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यद्येकस्यापि सार्द्धप्रहरनिशाभ्यन्तरे न वियोगस्तदा तयोरवियोगेऽपि प्रातरुत्सवान्ते पारणम् । तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाष्टम्युपवासपारणं मत्स्यमांसोपहारेण कर्त्तव्यम् । यथा,—
“अष्टम्यां समुपोष्यैव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥”
स्त्रियास्तु पशुमांसभक्षणनिन्दया न तेन पारणं किन्तु मत्स्येन । अष्टम्युपवासपारणे रविवारादौ मांसनिषेधः । एवं मांसाशनत्यागकृतनियमेन नियोगादिष्वपि मांसं वर्ज्जनीयम् ॥ * ॥
अथ श्रीरामनवमीव्रतपारणकालः ।
“नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥”
अथैकादशीव्रतपारणकालः ।
“मन्त्रं जपित्वा हरये निवेद्योपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्याद्वर्ज्जयित्वा ह्युपोदकीम् ॥”
द्वादशीलङ्घने दोषमाह नारदीयम् ।
“महाहानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ॥
विष्णुधर्म्मोत्तरे ।
“द्वादश्याः प्रथमः पा हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥”
अथ श्रवणद्वादश्युपवासपारणकालः ।
“तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल श्रवणं वर्द्धते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥”
तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः ॥ * ॥ अथ शिवरात्र्युपवासपारणकालः ।
“जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते ।
कृतोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥”
तिथ्यन्ते पारणन्तु जयन्तीमात्रपरम् । अत्र चतुर्द्दश्यामेव तत् ।
“ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतान्ते पारणे कृते ॥” * ॥
पारणदिने वर्ज्यानि यथा, ब्रह्माण्डपुराणम् ।
“कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
शिलापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्ज्जयेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥”
स्मृतिसन्तोषे ।
“कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥”
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्ग्रहणम् । इति तिथ्यादितत्त्वम् ॥

**पारतः**, पुं, ( विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योऽपीति डः । ) पारदः । इति हेमचन्द्रः । १ । ११६ ॥

**पारतन्त्र्यं**, क्ली, ( परतन्त्रस्य भावः । परतन्त्र + ष्यञ् । ) परतन्त्रता । पराधीनत्वम् । अन्यायत्तता । यथा, माधवकरः ।
“दोषाणां समवेतानां विकल्पेऽंशांशकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत् ॥”

**पारत्रिकं**, त्रि, ( परत्र भवम् । परत्र + ठक् । ) पारलौकिकम् । परत्र भवमित्यर्थे ष्णिकप्रत्ययनिष्पन्नम् ॥

**पारदः**, पुं, ( जरामरणसङ्कटादिभ्यः पारं ददातीति । दा + कः । ) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसलेहः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० जैत्रः ११ शिवबीजम् १२ शिवः १३ अमृतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अचिन्त्यजः २२ खेचरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७ स्कन्दः २८ स्कन्दांशकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्नावली ॥ हरबीजम् ३७ रजस्वलः ३८ । इति हेमचन्द्रः ॥ शिववीर्य्यम् ३९ शिवाह्वयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । क्रिमिकुष्ठनाशित्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अस्य भस्मनः पूर्णवीर्य्यं मासत्रयपर्य्यन्तं तिष्ठति । इति परिभाषा ॥ * ॥ अपि च ।
“पारदः सकलरोगनाशकः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितो
देहलोहवरसिद्धिकारकः ॥
मूर्च्छितो हरते व्याधीन् बद्धः खेचरसिद्धिदः ।
सर्व्वसिद्धिकरो लीनो निरुत्थो देहसिद्धिदः ॥
विविधव्याधिभयोदयमरणजरासङ्कटेऽपि मर्त्त्येभ्यः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥”
इति राजनिर्घण्टः ॥
तस्योत्पत्तिलक्षणे यथा,—
“शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥
अत्र भेदेन विज्ञेयं शिववीर्य्यं चतुर्व्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ॥
पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ।
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ॥
सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठनुत् ।
स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्द्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छित्वा हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात् ॥”
रसामृते ।
“यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥”
तस्य दोषा यथा,—
“मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥
मलेन मूर्च्छां मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्या-
च्चाञ्चल्यतो वीर्य्यहृतिश्च पुंसाम् ॥
वङ्गेन कुष्ठं भुजगेन गण्डो
भवेदतोऽसौ परिशोधनीयः ॥
वह्निर्व्विषं मलञ्चेति मुख्या दोषास्त्रयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥
संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥”
मारितस्य मूर्च्छितस्य तस्य गुणाः ।
“पारदः क्रिमिकुष्ठघ्नो जयदो दृष्टिदः सरः ।
मृत्युहृच्च महावीर्य्यो योगवाही जराहरः ॥
सत्योजोरूपदो वृष्यो वह्निकृद्धातुवर्द्धनः ।
षण्डत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥
पारदः सकलरोगहा स्मृतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन तद्गुणगणैर्व्विराजते ॥” * ॥
अथ रसस्य शोधनविधिः । तत्र स्वेदनम् ।
“नानाधान्यैर्यथा प्राप्तैस्तुषवर्जैर्जलान्वितैः ।
मृद्भाण्डं पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् ॥
तन्मध्ये भृङ्गराण्मण्डी विष्णुक्रान्ता पुनर्नवा ।